শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমহালক্ষ্ম্যৈ নমঃ

শ্রীমদ্বেঙ্কটাধ্বরিবিরচিতে শ্রীলক্ষ্মীসহস্রে

# ॥ বক্ষস্স্থলাবস্থানস্তবকঃ তৃতীযঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমহালক্ষ্ম্যৈ নমঃ

# ॥ ৱক্ষস্স্থলাৱস্থানস্তবকঃ তৃতীযঃ ॥

শ্রযে শেষাচলমণেঃ শার্ঙ্গিণো হৃদযঙ্গমাম্।
অনুকম্পামিৱাকম্পামম্বামম্বুজৱাসিনীম্॥ **3.1** ॥

কল্যাণ দিৱ্য করুণাদি গুণাম্বুরাশে
    কাঙ্ক্ষাধিকাভ্যুদযদাযিকটাক্ষলেশে।
ভদ্রায দৈত্যজিদুরঃকৃতনিত্যৱাসে
    ভক্তিস্থিরেণ মনসা ভৱতীমুপাসে॥ **3.2** ॥

নালীকসম্ভৱভৱাদিসুরাভিৱন্দ্যে
    নানাৱিধাকৃতক ৱাঙ্ময মৌলিৱেদ্যে।
পাথোধিপুত্রি পতিৱক্ষসি নিত্যহৃদ্যে
    ভান্তীমনন্যশরণো ভৱতীং প্রপদ্যে॥ **3.3** ॥

শয্যাগৃহং তৱ পিতা জগতাং নিযন্তুঃ
    ভ্রাতা দৃগেক ইতরঃ পুনরঙ্গভূষা।
ৱক্ষস্যমুষ্য ৱরদে ৎৱমৱস্থিতা তৎ
    ৱাল্লভ্যমম্ব ভৱদীযমনন্যলভ্যম্॥ **3.4** ॥

ভ্রাতুর্ৱিধোর্ৱসুসমৃদ্ধ্যসহেষু পদ্মে -
    ষ্ৱাস্তে রমেত্যপযশঃ প্রশমায নূনম্।
সোদর্যকৌস্তুভশুভাৱহমব্ধিকন্যে
    ৱক্ষস্ত্ৱমাৱসসি ৱেঙ্কটনাযকস্য॥ **3.5** ॥

ভগৱতঃ প্রতিঘো হৃদি মা স্ম ভূৎ
    সমুদযদ্বৃজিনেষু জনেষ্ৱিতি।
অৱহিতা জগদম্ব হিতায নো
    হৃদযমেৱ হরেরধিতিষ্ঠসি॥ **3.6**॥

ফণিশৈলপতেস্ত্বমিন্দিরে
    ভৱসি প্রাণসমেতি সাম্প্রতম্।
অমুনা ভৱতী যতঃ স্বযং
    হৃদযে প্রাণপদে নিৱেশিতা॥ **3.7**॥

উরগাদ্রিপতেরুরঃস্থলস্থা
    কমলে তদ্গলশঙ্খগর্ভমুক্তৈঃ।
শুচিহারমহঃ সুরস্রৱন্তী
    সলিলৈরম্ব সদাঽভিষিচ্যসে ৎৱম্॥ **3.8**॥

কুমারি ক্ষীরাব্ধেঃ কুসুমসুকুমারাঙ্গি ভৱতী
    নৱং পদ্মং সদ্ম ম্রদিম রমণীযং ৱিজহতী।
শরণ্যে ত্রাতুং নঃ শরকিণঘনং কৌস্তুভশিলা -
    কঠোরং গাঢোরঃ শ্রযসি কৃপযা কৈটভরিপোঃ॥ **3.9**॥

শ্রীৱৎসাঙ্কং চিরতরমুরঃ সীমগোষ্ঠং মুরারেঃ
    অধ্যাসীনামনঘহরিতোদারকান্ত্যাভিরামম্।
কল্যাণি ৎৱাং সুলভমমৃতং সংশ্রিতানাং দুহানাং
    ক্ষীরাম্ভোধেঃ সমুদিতৱতীং ব্রূমহে কামধেনুম্॥ **3.10**॥

ৱিশ্ৱাতীতো জযতি ৱৃজিনত্রাসদে ৱাসুদেৱঃ
    পদ্মে তস্যাপ্যুপরি মহিমা ভাসতে তাৱকীনঃ।
ক্ষেত্রজ্ঞানাং হৃদযমনিশং কঞ্জনাভোঽধিশেতে
    তস্যাপি ৎৱং হৃদি হৃততমোরাজসে রাজসে যৎ॥ **3.11**॥

ৱীক্ষন্তে যে ৱেঙ্কটক্ষ্মাভৃদিন্দোঃ
    সূরস্থানে শোভমানামিহ ৎৱাম্।
দুগ্ধোদন্ৱৎপুত্রি দিৱ্যং পদং তে
    সূরস্থানং হন্ত ভিৎৱা ৱিশন্তি॥ **3.12**॥

বলিৱসুমুষঃ প্রহর্ষা -
    দুচ্চোরস্থলমুপেত্য কমলে ৎৱম্।
অস্মাকমপথগানাং
    হরসে চিরকালসঞ্চিতানর্থান্॥ **3.13**॥

শশিলেখা ভৱতী চ
    শ্রীরঙ্ঘেরুদ্গতে তযোরাদ্যা।
ধারযতি কৃষ্ণমন্তঃ
    কৃষ্ণেনান্তস্তু ধার্যতে চরমা॥ **3.14**॥

ৱনমালাযা মুষিতাং
    ৱিশ্ৱৱিভোর্ভুজতমালৱিটপান্তঃ।
কামপি কনকলতাং ৎৱাং
    কলশাকূপারকন্যকে মন্যে॥ **3.15**॥

পরমতুলসীতমনঘে
    ৱনমালাপ্তং সুলক্ষ্মণাকলিতম্।
কলযসি সদ্রূপযুতং
    কমলে ৱক্ষো হরের্মহারামম্॥ **3.16**॥

দৃষ্টাত্মপ্রতিবিম্বিতেষু মণিষু দ্রাগিন্দিরে মা স্ম ভূৎ
    অন্তঃস্থেষ্ৱবলান্তরস্থিতিধিযা কোপস্তৱেত্যচ্যুতঃ।
শঙ্কোন্মেষকথাপথাতিপতিতং সন্ত্যক্তরত্নান্তরঃ
    তং ৎৱৎসোদরমেৱ কৌস্তুভমণিং ধত্তে ভুজাভ্যন্তরে॥ **3.17**॥

সস্নেহপূর্তিরুদিতত্রিদশোপসেৱঃ
    দীপ্তো হরেরুরসি দেৱি তৱেষ্টগেহে।
অস্মাকমান্তরতমঃ প্রশময্য মুক্তেঃ
    মার্গং প্রকাশযতু কৌস্তুভরত্নদীপঃ॥ **3.18** ॥

সরসিজনিলযাপি ৱৈভৱেন
    স্ফুরসি নিরেনসি মানসে মুনীনাম্।
উরসি মুররিপোরুপোঢহারে
    শিরসি চ দেৱি গিরাং পুরাতনীনাম্॥ **3.19** ॥

শুভশ্রীৱৎসাঙ্কং শুচিরুচিরহারং মুররিপোঃ
    তমালাভং ৱক্ষস্তরলৱনমালাসুরভিলম্।
পরিষ্কুর্ৱাণাং ৎৱাং ভৱজলধিশোষায কলযে
    জগন্মাতঃ প্রাতস্তনজলজদাযাদৱদনাম্॥ **3.20** ॥

প্রাচীনৱাকপরিষদাং পরতত্ত্বচিন্তাং
    ৱ্যালেন্দ্রভূধরপতির্ৱ্যপনেতুকামঃ।
কান্তো বিভর্তি ভৱতীং কলশাব্ধিকন্যে
    ভূষাৱিশেষমিৱ দেৱি ভুজান্তরালে॥ **3.21** ॥

স্বভাৱাদুন্মীলদ্বকুলসুমনঃ কোমলতনোঃ
    তৱ ক্লেশাশঙ্কাকুলিতহৃদযেনাপি হরিণা।
ৎৱদাক্রান্তে হন্ত ৱ্যুদসিতুমুরস্যম্ব পুলকা
    ন শক্যন্তে পদ্মে ন খলু সুলভঃ কণ্টকজযঃ॥ **3.22** ॥

নিরত্যযং নীলমহোনিধানং
    কান্তং মুকুন্দাভিধমিন্দিরে ৎৱম্।
নিরঞ্জনৈরেৱ জনৈর্গৃহীতং
    ৱীক্ষ্য স্থিতা ৱক্ষসি রক্ষিতুং কিম্॥ **3.23** ॥

জননি পুষ্যসি তামরসং পদং
ৱিতনুষে চ নতামরসংপদম্।
পরমুরস্ফুরণপ্রতিরোধিনং
পরমুরঃ স্ফুরণং নযসেঽদ্ভুতম্॥ **3.24** ॥

যদি নাম ৱিষ্ণুৱক্ষঃ
ক্ষণমত্যক্ষঃ ক্ষমামযি রমে ৎৱম্।
আগস্ৱিনস্তদা নো
নৈৱারক্ষিষ্যদূষ্মলো নাথঃ ॥ **3.25** ॥

হৃদযে কমলদলাক্ষি
ৎৱৎপদলাক্ষীযলক্ষ্ম ভৱতীং চ।
দধদূষ্মলোঽপি কৃষ্ণো -
ঽপ্যধিকারুণ্যং ৱহত্যহিগিরীশঃ ॥ **3.26** ॥

॥ ইতি শ্রীমদ্বেঙ্কটাধ্ৱরিৱিরচিতে শ্রীলক্ষ্মীসহস্রে ৱক্ষস্স্থলাৱস্থানস্তবকঃ তৃতীযঃ ॥